# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ६ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 2.3.6. New ) | गुणाः – ७० |
| दिनाङ्कः – १५/१०/२०१९ | सन्दर्भग्रन्थः शिक्षापत्री–१–६० | समयः –८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** (१०)

(१) शिक्षापत्रीलेखनहेतुं यथाभाष्यं परिचाययत ।

(२) सच्छास्त्रप्रतिपादितान् सदाचारान् अर्थदीपिकाटीकानुगुणं व्याख्यात ।

(३) स्ववर्णाश्रमधर्मो यः स हातव्यो न केनचित् ।
परधर्मो न चाचर्यो न च पाषण्डकल्पितः ॥ श्लोकमिमं टीकानुगुणं व्याख्यात ।

**प्रश्नः २ कस्यचिद् एकस्य प्रश्नस्य समाधानं कुरुत ।** (१०)

(१) वामे यस्य स्थिति राधा . . . . . . हृदि चन्तये ॥ पद्यमिदं टीकानुगुणं विवेचयत ।

(२) यथाग्रन्थम् अहिंसाधर्मं व्याख्यात ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** (१०)

(१) सत्यस्य याथार्थ्यम् अर्थदीपिकाटीकानुगुणं विवेचयत ।

(२) किं सत्वरं कार्यम् ? किञ्च न ? इति स्पष्टयत ।

(३) धर्मेण रहिता कृष्णभक्तिः कार्या न सर्वथा ।
अज्ञनिन्दाभयान्नैव त्याज्यं श्रीकृष्णसेवनम् ॥ इति श्लोकं सान्वयं व्याख्यात ।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः ।** (१०)

(१) सच्छास्त्रासच्छास्त्रयोः लक्षणानि यथाग्रन्थं लिखत ।

(२) शिक्षापत्र्यामुपदिष्टां स्वच्छतामुपपादयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** (१०)

(१) अर्थदीपिकाटीकानुसारम् आपद्धर्मं स्पष्टयत ।

(२) के निर्गुणाः भक्ता ? कथम् ? स्पष्टयत ।

(३) शिक्षापत्र्यनुसारं तिलकविधिः यथाक्रमं उपपाद्यताम् ।

**प्रश्नः ६  कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) नारायणमहेशयोः एकात्म्यम् अर्थदिपीकाटीकानुगुणं स्पष्टयत।

(२) प्रातः पूजाविधिः शिक्षापत्र्यनुसारं लिख्यताम्।

## चतुर्थान्वितिः

**प्रश्नः ७  अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत।** (१०)

(१) भगवता श्रीस्वामिनारायणेन शिक्षापत्री कमुद्दिश्य लिखिता ?

(२) शिक्षापत्र्यां कति श्लोकाः सन्ति ?

(३) शिक्षापत्रीलेखनस्य हेतुः कः ?

(४) शिक्षापत्र्याः रचना कुत्र जाता ?

(५) के सुखिनः भवन्ति ?

(६) गृहस्थाश्रमिणां मध्ये कः श्रेष्ठः भक्तः ?

(७) महान् धर्मः कः ?

(८) शिक्षापत्र्याः टीका केन लिखिता ?

(९) केषां निन्दा न कार्या ?

(१०) कीदृशो धर्मः न आचर्यः ?

(११) कीदृशं सत्यं न भाष्यम् ?

(१२) केषां प्रसङ्गः न कर्तव्यः ?

(१३) कानि शास्त्राणि न मान्यानि ?

(१४) रिक्तपाणिभिः कुत्र न गन्तव्यम् ?

(१५) शिक्षापत्र्याः टीकायाः नाम किम् ?

--००--